षोडशः पाठः

# मित्रं प्रति पत्रम्



प्रिय मित्र राहुल! रायपुरनगरात्

सस्नेहं नमस्कारः। दिनाङ्कः 5–12–05

तव पत्रं प्राप्य परमं प्रासीदम्। त्वं रायपुरनगरस्य दीपावल्याः शोभावर्णनम् अपृच्छः, अतः अत्रत्यां शोभां वर्णयामि।

अस्मिन् वर्षे नवम्बर मासस्य चतुर्दशतारिकायां दीपावल्याः उत्सवः अतीव आह्लादेन जनैः सम्पादितः। सर्वे जनाः स्वगृहाणि आपणान् च सुधया अलिम्पन्। क्रीडनकैः चित्रैश्च अलङ्कुर्वन्। आपणे नानाप्रकाराणि मिष्टान्नानि सज्जितानि आसन्। रात्रौ भवनेषु विद्युद्दीपपङ्क्तयः तैलदीपपङ्क्तयश्च नगरस्य शोभां वर्धयन्ति स्म। सर्वत्र महान् जनसम्मर्दः आसीत्। अहं वारं–वारं त्वाम् अस्मरम्। अस्तु।

त्वमपि स्वनगरस्य बिलासपुरस्य कस्यचिद् उत्सवस्य विषये लिखित्वा मम औत्सुक्यं तोषय। स्वपित्रोः चरणेषु सादरं मम प्रणामान् कथय।

तवाभिन्नं मित्रम्

**सूरजः**

अष्टम् श्रेणीस्थः

## शब्दार्थाः

सस्नेहम् = प्रेम सहित। तव = तुम्हारा। प्रासीदम् = प्रसन्न हुआ। अपृच्छः = पूछे हो। अस्मिन् = इसमें। चतुर्दशतारिकायाम् = 14वीं तिथि में। अतीव = अधिक। आह्लादेन = खुशी से, आनन्द से। जनैः = मनुष्यों द्वारा। सम्पादितः = मनाया गया। स्वगृहाणि =अपने घरों को। आपणान् = दुकानों को। सुधया = चूना से। अलिम्पन =पुताई किए। अलङ्कुर्वन्–सजाये। वर्धयन्ति = वृद्धि करते हैं, बढ़ाते हैं। जनसम्मर्दः = लोगों की भीड़। कस्यचित् = किसी के। औत्सुक्यम् = उत्सुकता को। तोषय = सन्तुष्ट करो। कथय = कहो।

## अभ्यासप्रश्नाः

**(1) निम्नांकित प्रश्नों के उत्तर लिखिए –**

(अ) अस्मिन् पत्रे कस्य शोभावर्णनं वर्तते ?

(ब) सूरजः कस्मिन् नगरे निवसति ?

(स) दीपावल्याः उत्सवः कदा भवति ?

(द) जनाः स्वगृहाणि आपणान् च केन माध्यमेन अलङ्कुर्वन्ति ?

(इ) आपणे नानाप्रकाराणि कानि सज्जितानि आसन् ?

**(2) निम्नांकित शब्दों का सन्धि विच्छेद कर नाम लिखिए –**

चित्रैश्च, अलङकुर्वन्, दीपावल्याः, नमस्कारः, त्वमपि।

**(3) दिए हुए शब्दों को उचित रिक्त स्थानों में भरिए –**

(जनाः, सर्वत्र, त्वाम्, वर्णयामि, परमम्)

(1) .............. महान् जनसम्मर्दः आसीत्।

(2) अतः अत्रत्यां शोभां ..............।

(3) सर्वे .................. स्वगृहाणि सुधया अलिम्पन् ।

(4) अहं वारं–वारं ................ अस्मरम्।

(5) तव पत्रं प्राप्य ............... प्रासीदम्।

QLC8KY

**(4) निम्नांकित शब्दों के विभक्ति और वचन लिखिए–**

अस्मिन्, दीपावल्याः पित्रोः, आह्लादेन, जनैः।

**(5) "दीपावलि" इकारान्त स्त्रीलिङ्ग शब्द की कारक रचना लिखिए।**